# Prabhat Kids School, Akola 2025-26
(CBSE Affiliation No. 1130426)

Std.VI Section : ____________ Subject : Sanskrit Marks : 80

Date : ______________ Term-I

Name :____________________________________________ Roll No. ____________ Time : 3 Hrs.

## खण्ड: 'क'

### (अपठित अवबोधनम्)

**प्रश्न १ : अधोलिखितं अपठितं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि लिखत। १० अङ्का:**

'दिल्लीनगरम्' इति भारतस्य राजधानी। अस्या: प्राचीनं नाम 'इन्द्रप्रस्थम्' अस्ति। 'नई दिल्ली' इति स्थाने केन्द्रियप्रशासनस्य कार्यालया: सन्ति। भारतस्य राष्ट्रपति:, उपराष्ट्रपति:, प्रधानमन्त्री, अन्ये अपि सर्वे केन्द्रियमन्त्रिण: सांसदा: च दिल्लीनगरे एव निवसन्ति। दिल्लीनगरं सर्वस्य आकर्षणकेन्द्रम् अस्ति। अत्र दूरदर्शनकेन्द्रम् अस्ति। दिल्ली शिक्षाया: अपि प्रमुखं केन्द्रम् अस्ति। अत्र दिल्लीविश्वविद्यालय:, जवाहरलालनेहरूविश्वविद्यालय: केन्द्रीयसंस्कृत–विद्यापीठश्च सन्ति। दिल्ली भारतस्य हृदयम् इव अस्ति।

**प्रश्ना:**

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** (२ अङ्का:)

१) शिक्षाया: प्रमुखं केन्द्रं किम् अस्ति।?

२) दिल्लीनगरस्य प्राचीनं नाम किम् अस्ति?

३) दिल्ली कस्य हृदयम् अस्ति?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** (४ अङ्का:)

१) दिल्लीनगरे के के निवसन्ति?

२) दूरदर्शनकेन्द्रं कुत्र अस्ति?

३) दिल्लीनगरं कस्य आकर्षणकेन्द्रम् अस्ति?

**III) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नत्रयम्)** (३ अङ्का:)

१) 'दिल्ली शिक्षाया: अपि प्रमुखं केन्द्रम् अस्ति।' अत्र किं अव्ययपदं अस्ति।

क) प्रमुखम् ख) अपि ग) केन्द्रम् घ) अस्ति

२) 'अस्ति' पदस्य बहूवचनं किम्?

क) स्त: ख) अस्ति ग) सन्ति घ) स्म:

३) 'प्राचीनम्' इति पदस्य विलोमपदं किम्

क) आधुनिकम् ख) खगोल ग) तत्र घ) अत्र

४) 'भारतस्य' पदे विभक्ति: का?

क) प्रथमा ख) द्वितीया ग) षष्ठी घ) सप्तमी

**IV) गद्यांशस्य कृते उचितं शीर्षकं लिखत।** (१ अङ्क:)

Sample Paper Prabhat Kids School, Akola

## खण्डः 'ख'

## (रचनात्मक कार्यम्)

**प्रश्न २ : अधोदत्ते चित्रं दृष्ट्वा मञ्जूषायाः सहायतया पञ्च वाक्यानि रचयत।** **५ अङ्काः**

**(मञ्जूषा – पुष्पाणि, विद्यालयस्य, सन्ति, एतत्, चित्रम्, खेलन्ति, अस्ति, बालकाः, हंसाः, तरन्ति, वृक्षः, विशालः, खगाः, अस्ति, उत्पतन्ति)**




**प्रश्न ३ : मञ्जूषायाः सहायतया संवादं पूरयत।** **५ अङ्काः**

**(मञ्जूषा – आकाशे, अस्ति, पश्यसि, बहिः, उत्पतन्ति)**

**दिव्या** – त्वम् इदं चित्रं (१) ............।

**रश्मि** – आम्! अतिशोभनम् (२) ..............।

**दिव्या** – (३) ........... खगाः प्रसन्नाः सन्ति।

**रश्मि** – ते इतस्ततः (४) ..............।

**दिव्या** – त्वम् गृहात् (५) ............ आगच्छसि।
तत्र आवाम् सूर्योदयं पश्याव:।

Sample Paper
Prabhat Kids School, Akola

**प्रश्न ४ : मञ्जूषायाः सहायतयाः कथां पूरयत।** **५ अङ्काः**

**(मञ्जूषा – खगाः, वटवृक्षः, वृक्षात्, वानरः, गृहस्य)**

यमुनातीरे एकः (१)............ आसीत्। तस्मिन् वृक्षे स्वपरिश्रमेण निर्मितेषु नीडेषु (२)........... सुखेन वसन्ति स्म। तत्र वृक्षे कश्चित् (३) ............... अपि वसति स्म। एकदा वानरः वृष्टिजलेन अतीव आर्द्रः कम्पितः च अभवत्। खगाः शीतेन कम्पमानं तं वानरम् अवदन् – "भो वानर! त्वं कष्टम् अनुभवसि। तत् कथं (४) ............. निर्माणं न करोषि।" सः वानरः एतत् श्रुत्वा अचिन्तयत् – "अहो! एते क्षुद्राः खगाः मां निन्दन्ति।" अतः सः वानरः क्रोधेन खगानां नीडानि (५) ............. अधः अपातयत् अनश्यत् च। नीडैः सह खगानाम् अण्डानि अपि नष्टानि जातानि।

उक्तं च – 'उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।'

## खण्डः 'ग'

### (व्याकरणम्)

**प्रश्न ५ : वर्णविच्छेदनं कुरुत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

१) कण्ठ: – २) वर्ण: – ३) अज: –

४) वधू: – ५) ज्ञानम् –

**प्रश्न ६ : रिक्तस्थानानि पूरयन्तु। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| पत्रम् | १) .............. | पत्राणि |
| चित्रम् | चित्रे | २) .............. |
| ३) .............. | गृहे | ४) .............. |
| वनम् | ५) ............... | वनानि |

**प्रश्न ७ : पदानि चित्वा लिङ्गानुसारं उचितं स्थाने पूरयत। (केवलं प्रश्नअष्टशब्दा:)** **४ अङ्का:**

**(मञ्जूषा – सैनिक:, गायिका, महिषी, जलम्, चषक:, द्वारम्, अजा, वृक्ष:, वातायनम्)**

| एष: (पुल्लिंग) | एषा (स्त्रीलिंग) | एतत् (नपुसकलिंग) |
|---|---|---|
| ............. | ............. | ............. |
| ............. | ............. | ............. |
| ............. | ............. | ............. |

Sample Paper
Prabhat Kids School, Akola

**प्रश्न ८ : उचितेन क्रियापदेन रिक्तस्थानं पूरयन्तु। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

१) लेखक: .............. (लिखति / लिखन्ति)

२) नर्तका .............. (नृत्यत: / नृत्यन्ति)

३) चालक: ................. (चालयति / चालयन्ति)

४) अहम् ................ (वदति / वदामि)

५) त्वम् ................ (वदसि / वदथ:)

**प्रश्न ९ : अधोलिखितेषु वाक्येषु मञ्जूषात: उचितै:, सर्वनामपदै:, रिक्तस्थानानि पूरयन्तु।(केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

**(मञ्जूषा – त्वम्, अहम्, वयं, यूयं, आवां)**

१) विद्यालये .......... स्म:। २) अत्र ........... अस्मि।

३) मञ्चे ............ नर्तक्य: स्थ। ४) ............ वदसि।

५) ............ शिक्षकौ स्व:।

**प्रश्न १० : अधोलिखितेभ्य: वाक्येभ्य: अव्ययपदानि चित्वा लिखन्तु। (केवलं प्रश्नपञ्चकम्) ५ अङ्का:**

**अव्ययपदानि**

१) एक: वानर: वृक्षस्य उपरि तिष्ठति। ..................
२) स: फलानि अध: क्षिपति। ..................
३) एक: वानर: सर्वत्र भ्रमति। ..................
४) अमित: गृहात् बहि: गच्छति। ..................
५) तत्र एक: बिडाल: अस्ति। ..................
६) बिडाल: गृहस्य अन्त: प्रविशति । ..................

**खण्ड: 'घ'**

**(पठित अवबोधनम्)**

**प्रश्न ११ : अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत। ५ अङ्का:**

राधिका एषु दिनेषु कूर्दमाना **एव** चलति। **यत:** गृहे नूतना: अतिथय: सन्ति। ते **च** विशिष्टा: सन्ति। माता, पुत्रौ, पुत्र्यौ च मिलित्वा ते **तत्र** पञ्च सन्ति। अहोरात्रं तस्या: चिन्ता **एकत्र एव**। गृहस्य छद्या: **उपरि**। **तत्र** एव तस्या: मन: अस्ति। कुतूहलम् अस्ति, के ते इति? ते न अन्ये, **काचित्** मार्जारी तस्या: चत्वार: शावका: च। आम्, ते एव विशिष्टा: अतिथय:। सा तु तेषा नामानि अपि चिन्तितवती – तन्वी, मृद्वी, शबल:, भीम: च इति। तन्वी आकृत्या सुन्दरी, मृद्वी स्पर्शेन अतीव कोमला।

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) (१ अङ्क:)**

१) गृहे कति अतिथय: सन्ति?
२) राधिका कथं चलति स्म?
३) शावका: कति सन्ति?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नैकम्) (२ अङ्का:)**

१) मार्जारीशावकानां नामानि कानि?
२) के मिलित्वा पञ्च सन्ति?
३) का स्पर्शेन अतीव कोमला?

**III) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) (२ अङ्का:)**

१) 'अहोरात्रं' पदस्य अर्थं चित्वा लिखत।
क) सम्पूर्णे दिने ख) रात्रि: ग) दिनम् घ) दिन–रात्र

२) 'ते च विशिष्टा: सन्ति।' एतस्मिन् वाक्ये अव्ययपदं किम्?
क) विशिष्टा: ख) च ग) ते घ) सन्ति

३) 'उपरि' पदस्य विलोमपदं चित्वा लिखत।
क) अध: ख) अत्र ग) अपि घ) सर्वत्र

४) 'राधिका एषु दिनेषु कूर्दमाना एव चलति।' एतस्मिन् वाक्ये क्रियापदं किम्?
क) एषु ख) चलति ग) एव घ) राधिका

Sample Paper
Prabhat Kids School, Akola

**प्रश्न १२ : अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **५ अङ्का:**

शूरा वयं धीरा वयं वीरा वयं सुतराम्
गुणशालिनो बलशालिनो जयगामिनो नितराम्।।
दृढमानसा गतलालसा: प्रियसाहसा: सततम्
जनसेवका अतिभावुका: शुभचिन्तका नियतम्।।
धनकामना सुखवासना न च वञ्चना हृदये।
अर्जस्वला वर्चस्वला अतिनिश्चला विजये।।

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(१ अङ्क:)**

१) वयं कीदृशा: मानसा: स्म: ?
२) शुरा: के ?
३) वयं किं चिन्तका स्म: ?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नैकम्)** **(२ अङ्का:)**

१) वयं के ?
२) वयं कीदृशा: साहसा: स्म: ?
३) किं वञ्चना हृदये न ?

**III) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **(२ अङ्का:)**

१) वयं पदस्य एकवचनं चिनुत।
क) अहम् ख) त्वम् ग) आवाम् घ) युवाम्
२) 'वयम्' पदस्य कृते उचितं क्रियापदं चिनुत।
क) पठामि ख) पठाम: ग) पठाव: घ) पठथ:
३) 'प्रिय:' पदस्य विलोम पदं चिनुत।
क) सप्रिय: ख) अप्रिय: ग) प्रियम: घ) सर्वम्

Sample Paper
Prabhat Kids School, Akola

**प्रश्न १३ : प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

१) गोपाल: <u>दशवादने</u> कार्यालयं गच्छति।
२) <u>बालिका</u> धावति।
३) <u>पत्रम्</u> पतति।
४) <u>शुक:</u> वदति।
५) <u>तानि</u> पुष्पाणि।

**प्रश्न १४ : उचितेन पदेन रिक्तस्थानं पूरयन्तु। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

१) नायिका ................। (नृत्यत: / नृत्यति)
२) बालक: ................। (लिखति / लिखत:)
३) फलानि ...............। (पतति / पतन्ति)
४) छात्रौ ..............। (क्रीडत: / क्रीडन्ति)

५) महिला: .............। (वदन्ति / वदति)

**प्रश्न १५ : समयं संख्याभि लिखन्तु। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्काः**

१) सार्ध दशवादनम् –

२) दशवादनम् –

३) सपाद षड्वादनम् –

४) सार्ध चतुर्वादनम् –

५) पादोन एकादशवादनम् –

**प्रश्न १६ : अधोलिखितानि पदानि परस्परं संयोज्य वाक्यानि लिखत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्काः**

| **क** | **ख** | |
|---|---|---|
| १) अहम् | क) पठसि | ____________ |
| २) आवाम् | ख) पठथ | ____________ |
| ३) वयम् | ग) पठाव: | ____________ |
| ४) त्वम् | घ) पठामि | ____________ |
| ५) यूयम् | ङ) पठाम: | ____________ |

**प्रश्न १७ : शब्दान् अर्थैः सह मेलयत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्काः**

| **क** | **ख** |
|---|---|
| १) प्रतिदिनम् | क) निश्चित |
| २) वन्दनम् | ख) पराक्रमी |
| ३) दृढमानसा | ग) हर दिन |
| ४) नियतम् | घ) अभिवादन |
| ५) शूराः | ङ) दृढमन वाले |

Sample Paper
Prabhat Kids School, Akola

---------